संस्कृतवर्षस्मृतिग्रन्थमाला
अप्रकाशितपाण्डुलिपिग्रन्थप्रकाशनम् - २
प्रधानसम्पादकः - वेम्पटि कुटुम्बशास्त्री

श्रीमदन्नम्भट्टविरचिता

तत्त्वचिन्तामण्यालोकव्याख्या

# सिद्धाञ्जनम्

(प्रामाण्यवादे ज्ञप्तिवादपर्यन्तो भागः)

सम्पादकः
मुळ्ळपूडि विश्वनाथशास्त्री

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

श्री शिवाय गुरवे नमः

# - भूमिका -

इह खलु मोक्ष एव परमः पुरुषार्थ इति मोक्षवादिभिः सर्वैरपि अभ्युपगतः सिद्धान्तः। मोक्षश्च संसारमूलकारणनाशात् भवति। संसारमूलकारणान्वेषणे च प्राज्ञाः स्वस्वबुद्ध्यनुसारं विभिन्नान् मार्गान् प्रादर्शयन्। त एव प्राज्ञाः दर्शनकाराः इत्यभिधीयन्ते। संसारमूलकारणनाशकज्ञानसाधनं च दर्शनमित्युच्यते। तादृशं साधनं विद्यैव। तथा च तादृशविद्याया एव दर्शनमिति नाम। करणव्युत्पन्नदर्शनशब्दस्यापि अयमेवार्थः। दृश्यते = यथार्थरूपतया ज्ञायते अलौकिकार्थः इति व्युत्पत्त्या अलौकिकार्थपरिज्ञानजनकस्य शास्त्रस्य दर्शनशब्दवाच्यत्वात्।

दर्शनकर्तृषु केचित् वेदप्रामाण्यमनभ्युपगम्य केवलं बुद्धिबलेनैव संसारमूलकारणमन्वेषणीयमिति विश्वसन्ति स्म। ते च नास्तिका इत्युच्यन्ते, तद्रचितदर्शनानि च नास्तिकदर्शनानि इति।

अपरे च पुरुषबुद्धेः भ्रमप्रमादादिदोषभूयिष्ठत्वात् केवलबुद्धिबलेन संसारमूलकारणं यथार्थतया ज्ञातुं न शक्यते। किन्तु अनादितया वा भ्रमप्रमादादिदोषरहितेश्वरनिर्मितत्वेन वा वेदानां परमप्रमाणत्वात् तत्सहकारेणैव संसारमूलकारणं अन्वेष्टव्यमित्यभिप्रयन्ति स्म। ते च आस्तिका इति, तद्रचितदर्शनानि आस्तिकदर्शनानि इति च उच्यन्ते।

तथा च वेदप्रामाण्याङ्गीकर्तृभिः रचितानि दर्शनानि आस्तिकदर्शनानि इति, वेदप्रामाण्यानङ्गीकर्तृभिः रचितानि दर्शनानि नास्तिकदर्शनानीति च सिद्धम्।

तत्र आस्तिकदर्शनानि षट् वर्तन्ते। तेषु अन्यतमं न्यायदर्शनम्। अस्य च न्यायदर्शनस्य मूलपुरुषः गौतममहर्षिः। तस्यैव अक्षपादः इति नामान्तरमपि विद्यते। सः न्यायदर्शनं सूत्ररूपेण पञ्चसु अध्यायेषु उपनिबद्धवान्। तस्य वात्स्यायनः भाष्यमकरोत्। तदन्तरं च तदुभयरचितग्रन्थावाधारीकृत्यैव बहवः दिग्दन्तितुल्याः महापण्डिताः अनेकविधान् ग्रन्थान् अरचयन्। इत्थं च प्राप्तविस्तृतरूपम् इदं न्यायशास्त्रं समग्रमपि यद्यप्येकमेव तथाप्याधुनिकैः प्राचीनन्यायशास्त्रमिति, नवीनन्यायशास्त्रमिति च द्विधा विभज्य व्यपदिश्यते। अयं च विभागः श्रीमद्गङ्गेशोपाध्यायमवधीकृत्यैव प्रवृत्त इति सर्वसम्मतम्। तथा च गङ्गेशोपाध्यायात् प्राक्तनैः पण्डितैः न्यायशास्त्रे ये ये ग्रन्था रचितास्तेषां प्राचीनन्यायशास्त्रमिति व्यपदेशः। गङ्गेशविरचिततत्त्वचिन्तामणिमारभ्य पश्चात्कालिकैः न्यायशास्त्रे ये ये ग्रन्थाः रचिताः तेषां सर्वेषां नवीनन्यायशास्त्रमिति व्यपदेशः। अत एव यथा व्याकरणशास्त्रस्य सम्प्रदायप्रवर्तकाः महापुरुषाः पाणिनिकात्यायनपतञ्जलयः त्रयः, एवं न्यायशास्त्रस्यापि गौतमवात्स्यायनगङ्गेशाः त्रयः सम्प्रदायकर्तारः इति वचनेऽपि न कापि अतिशयोक्तिः। अयं गङ्गेशः न्यायशास्त्रे तत्त्वचिन्तामणिनामकं ग्रन्थं अलिखत्। गङ्गेशस्य जन्मस्थानं मिथिलास्थः कश्चन ग्रामविशेषः, जीवनकालश्च ऐसवीयत्रयोदशशतकम्।

# - विषयानुक्रमणिका -


| | | |
|---|---|---|
| शुभ सन्देश | | v |
| आमुखम् | | vii |
| प्ररोचना | | ix |
| भूमिका | | xi-xxvi |
| 1. | **शास्त्रारम्भसार्थक्यविचारः।** .............. | 1 |
| 2. | अथ शब्दार्थविचारः। ............... | 1 |
| 3. | शास्त्रमशक्यार्थोपदेशकत्वात् व्यर्थमिति माध्यमिकशङ्का, तन्निरासश्च । | 2 |
| 4. | सामान्यमुखीयव्याप्त्या प्रामाण्यज्ञानस्य प्रवृत्तिहेतुत्वसाधनम् ।.... | 4 |
| 5. | **प्रथमा विप्रतिपत्तिः।** ............... | 11 |
| 6. | प्रथमविप्रतिपत्तौ ज्ञानपदसार्थक्यविचारः । ............... | 11 |
| 7. | तृतीयविप्रतिपत्तितः अभेदनिरासः । ............... | 12 |
| 8. | सामग्र्यां सविषयज्ञानग्राहकत्वविशेषणप्रक्षेपावश्यकता ।.......... | 20 |
| 9. | सविषयकत्वस्य दुर्वचत्वाक्षेपः । ............... | 21 |
| 10. | शब्दानुपस्थितस्यापि शाब्दबोधे भासमानत्वोपपादनम् ।........... | 22 |
| 11. | उपाध्यायमतम् । ............... | 22 |
| 12 | उपाध्यायमतखण्डनम् । ............... | 23 |
| 13. | यावत्पदवैयर्थ्यशङ्का । ............... | 26 |
| 14. | यावत्पदसार्थक्यम् । ............... | 26 |
| 15. | अप्रामाण्याग्राहकपदसार्थक्यम् । ............... | 27 |
| 16. | तत्पदसार्थक्यम् । ............... | 28 |
| 17. | तदप्रामाण्यमित्यत्र समासविचारः । ............... | 29 |
| 18. | तदप्रामाण्यमित्यत्र समासविचारे स्वमताविष्करणम् ।........... | 29 |
| 19. | **द्वितीया विप्रतिपत्तिः।** ............... | 32 |
| 20. | पक्षसङ्कोचः आवश्यको वा न वा इति विचारः। .............. | 37 |
| 21. | प्रथमज्ञानपदसार्थक्यम् । .............. | 39 |
| 22. | द्वितीयज्ञानपदसार्थक्यम् । .............. | 39 |
| 23. | तृतीयज्ञानपदसार्थक्यम् । .............. | 40 |
| 24. | विधिनिषेधकोट्योः प्रसिद्धिनिरूपणम् । .............. | 40 |
| 25 | **तृतीया विप्रतिपत्तिः।** .............. | 45 |
| 26. | एवकारार्थविचारः । .............. | 45 |
| 27. | प्रथमविप्रतिपत्तितो भेदनिरूपणम् । .............. | 47 |
| 28. | यज्ञपत्युपाध्यायमतदूषणम् । .............. | 48 |
| 29. | **चतुर्थी विप्रतिपत्तिः।** .............. | 51 |

ननु धर्मिण उभयवादिसिद्धस्यैव पक्षत्वम् । न चेह धर्म्युभयसिद्धः। प्रकारगर्भत्वात् प्रामाण्यस्य, तस्य च भासमानवैशिष्ट्यप्रतियोगित्वरूपत्वात् । न च परमतेऽपि विशिष्टधियो वैशिष्ट्यं विषयः। अगृहीतासंसर्गकधर्मधर्मिविषयकैकधियस्तथात्वादिति ।

मैवम् । न हि तत्रापि धर्मधर्मिपदं वास्तवतत्परम्, व्यवच्छेद्यसमूहालम्बनाद्यवच्छेदस्य वक्ष्यमाणत्वात्, किन्त्वस्सन्मतसिद्धप्रतियोगित्वानुयोगित्वरूपस्वरूपसम्बन्धविशेषरूपधर्मत्वादिपरम्। तन्मतेऽपि विशिष्टधियो विशेषणत्वविशेष्यत्वात्मकस्वरूपसम्बन्धविशेषविषयत्वात् । तथा च तत्प्रकारकत्वं तद्धर्मत्वगोचरत्वमिति किं अनुपपन्नम् ?


निगर्वस्तु प्रामाण्यपदं समर्थप्रवृत्तिजनकतावच्छेदकधर्मपरम् । तेन सर्वसाधारणपक्षलाभः। यावदित्यादिग्राह्यजातीयत्वञ्च साध्यम् । तेन नांशतो बाधः । अत एव करणनिष्ठतादृशधर्मे बाधवारणार्थमिति ।

---



तद्वति तत्प्रकारकत्वलक्षणप्रामाण्यं न पक्षः । परमते अप्रसिद्धेरिति शङ्कते — नन्विति। तथा च सति को दोष इत्याह — तस्येति । प्रकारत्वस्येत्यर्थः। तत् कथं परेषामनभिमतमत आह — न च परमत इति । वैशिष्ट्यस्य (अ) भाने भासमानवैशिष्ट्यप्रतियोगित्वरूपं प्रकारत्वं नास्तीत्यर्थः । तर्हि विशिष्टज्ञानस्य समूहालम्बनात् कथं भेदोऽत आह — अगृहीतेति । अयं पुरुषः अयं दण्डः इति ज्ञानद्वयस्य धर्मधर्मिविषयकस्य विशिष्टज्ञानत्वनिरासाय एकधिय इति । घटपटाविति समूहालम्बनवारणाय धर्मधर्मीति । दण्डपुरुषावसंस्पृष्टा वितिज्ञानवारणाय अगृहीतेति ।

तन्मतेऽपि अस्मदभिमतप्रकारकत्वमस्तीति समाधत्ते — मैवमिति । तत्रापि । तदभिमतविशिष्टधीलक्षणेऽपि । वस्तुतो दण्डो धर्मः, पुरुषो धर्मी, तद्गोचरस्य दण्डपुरुषाविति समूहालम्बनस्य अव्यावर्तनादित्यर्थः । तर्हि किं विवक्षणीयमत आह — किन्त्वति । प्रतियोगित्वेति । वैशिष्ट्यप्रतियोगित्वं धर्मत्वम्, तदनुयोगित्वं धर्मित्वम् । अस्माकमपि भासमानत्वं प्रतियोगित्व-विशेषणम्। वैशिष्ट्यमात्रविशेषणत्वे दण्डपुरुषौ संयुक्ताविति समूहालम्बने वैशिष्ट्यस्य भासमानत्वात् वस्तुतो दण्डस्य तत्प्रतियोगित्वात् दण्डस्य प्रकारतापत्तेः । तन्मते धर्मत्वमपि तदेव। तस्य भासमानत्वाङ्गीकारात् प्रकार (क) त्वमप्यङ्गीकृतमेवेत्यर्थः। प्रतियोगित्वरूपधर्मत्वभानम् तैरङ्गीक्रियत इत्याह — तन्मत इति । वैशिष्ट्यप्रतियोगित्वं विशेषणत्वं च स्वरूपविशेषरूपम्, समूहालम्बनव्यावृत्तं एकमेवेत्यर्थः। एवं च पक्षस्य उभयवादि सि [द्धि] (द्ध) त्वोपपत्तिरित्याह — तथा चेति ।

ननु प्रमापदप्रवृत्तिनिमित्तत्वपक्षे सर्वमतेऽपि बाधः । तद्वति तत्प्रकारकानुभवस्य स्मृतिव्यावृत्तस्य तत्प्रवृत्तिनिमित्तत्वादित्यरुचेराह — निगर्वस्त्विति । अत्र जनकता प्रयोजकता। अवच्छेदकत्वं च अनतिप्रसक्तत्वम् न तु स्वरूपविशेषरूपम् । तस्य लाघवेन तद्वति तत्प्रकारकत्व-



**Rashtriya Sanskrit Sansthan**

56-57, Institutional Area, Janakpuri,
New Delhi 110 058